# 2019

## SANSKRIT

## ( Major )

Paper : 3.1

*Full Marks* : 80

*Time* : 3 hours

*The figures in the margin indicate full marks for the questions*

**1.** Answer the following questions : 1×5=5

(a) What term is used to mean the Chapters of the *Rāmāyaṇa*?

(b) ''सर्वगुणोपेतः कौसल्यानन्दवर्धनः''

Who is 'कौसल्यानन्दवर्धनः' referred to here?

(c) What is the meaning of the term 'शूर्पणखा'?

(d) What is the name of the Śāntiparvan, Chapter 191 of the *Mahābhārata*?

(e) How many types of Dāna are there according to the Śāntiparvan (Chapter 191) of the *Mahābhārata*?

**2.** Explain any *two* of the following : 5×2=10

*(a)* प्रजापतिसमः श्रीमान् धाता रिपुनिषूदनः।
रक्षिता जीवलोकस्य धर्मस्य परिरक्षिता॥

*(b)* सर्वदाभिगतः सद्भिः समुद्र इव सिन्धुभिः।
आर्यः सर्वसमश्चैव सदैव प्रियदर्शनः॥

*(c)* जनकस्य कुले जाता देवमायेव निर्मिता।
सर्वलक्षणसम्पन्ना नारीणामुत्तमा वधूः॥

**3.** Answer any *two* of the following : 10×2=20

*(a)* Write a note on the elements of poetic beauty of Chapter I of the Bālakāṇḍa of the *Rāmāyaṇa*.

*(b)* Present the contexts of Chapter I of the Bālakāṇḍa of the *Rāmāyaṇa*.

*(c)* Elucidate the idea contained in the following :

*(i)* पूर्वं दत्तवरादेवी वरमेनमयाचत।

*(ii)* सीताऽप्यनुगता रामं शशिनं रोहिणी यथा।

**4.** Explain any *two* of the following : 5×2=10

*(a)* हुतेन शाम्यते पापं स्वाध्यायैः शान्तिरुत्तमा।
दानेन भोगानित्याहुस्तपसा स्वर्गमाप्नुयात्॥





*(b)* असद्भ्यो दीयते यत्तु तद् दानमिह भुज्यते।
यादृशं दीयते दानं तादृशं फलमश्नुते॥

*(c)* अतिथिर्यस्य भग्नाशो गृहात् प्रतिनिवर्तते।
स दत्त्वा दुष्कृतं तस्मै पुण्यमादाय गच्छति॥

**5.** Answer any *two* of the following : 10×2=20

*(a)* यदेतच्चातुराश्रम्यं ब्रह्मर्षिविहितं पुरा।
तेषां स्वे स्वे समाचारास्तान् मे वक्तुमिहार्हसि॥

Who is the speaker here? To whom it was stated? Explain the features of the first two Āśramas as you find in your prescribed text from the *Mahābhārata*.

*(b)* Write a note on the contents of the Śāntiparvan, Chapter 191, of the *Mahābhārata*.

*(c)* Write short notes on 'धर्म' and 'त्रिवर्ग'.

**6.** Read the following passage and answer the questions in Sanskrit :

कस्मिंश्चित् नगरे चन्दो नाम भूपतिः प्रतिवसति स्म। तस्य पुत्राः वानरक्रीडारताः वानरयूथं नित्यमेव विविधैः भोज्यपदार्थैः पुष्टिं नयन्ति स्म। तस्मिन् राजगृहे बालवाहनयोग्यं मेषयूथम् आसीत्। तेषां मेषाणां मध्ये एको मेषः जिह्वालोलुपतया अहर्निशं महानसं प्रविश्य यत् पश्यति तद् भक्षयति। ते च सूपकाराः यत्किञ्चित् काष्ठं, मृण्मयं भाजनं वा पश्यन्ति तेन तम् आशु तारयन्ति स्म।

मेषस्य सूपकाराणां च कलहम् अवेक्ष्य वानरयूथपतिः अचिन्तयत्—''एतेषां कलहो न वानराणां हिताय।'' एवं विचार्य स यूथपः सर्वान् कपीन् आहूय अवदत्—''सूपकाराणां मेषेण सह एषः कलहः नूनं भवतां विनाशकारणं भविष्यति। तदेतद् राजभवनं परित्यज्य वनं गच्छामः।''

तस्य वचनम् अश्रद्धेयं मत्वा मदोद्धताः कपयः अवदन्—''भो किमिदम् उच्यते? न वयं स्वर्गसमानोपभोगान् विहाय अटव्यां क्षार-तिक्त-कषाय-कटु-रूक्षफलानि भक्षयिष्यामः।'' तच्छ्रुत्वा यूथपतिः उक्तवान्—''रसनास्वादलुब्धाः यूयम् अस्य सुखस्य कुपरिणामं न जानीथ। अहं तु वनं गच्छामि।''

अथ अन्यस्मिन् अहनि स मेषो यावत् महानसं प्रविशति तावत् सूपकारेण अर्धज्वलितकाष्ठेन ताडितः। तथा मेषः वह्निना जाज्वल्यमानशरीरः निकटस्थाम् अश्वशालां प्रविशति। तस्य क्षितौ प्रलुठतः तृणेषु वह्निज्वालाः समुत्थिताः। ततः अश्वाः प्राणत्राणाय इतस्ततः अधावन्। तदा सर्वे भयत्रस्ताः कपयः अचिन्तयन्— हा! हताः वयम्। अवधीरिताः अस्माभिः गुरुजनोपदेशः॥

(a) राजपुत्राः प्रासादे कैः सह क्रीडन्ति स्म? 1

(b) राजगृहे कीदृशं मेषयूथम् आसीत्? 1

(c) जिह्वालोलुपतया मेषः कुत्र प्रविशति स्म? 1

(d) के पाकशालां प्रविष्टं मेषं ताडयन्ति स्म? 1

(e) किमर्थम् अश्वाः इतस्ततः अधावन्? 1





(f) सूपकाराः मेषं कैः वस्तुभिः ताडयन्ति स्म? 2

(g) मेषस्य सूपकाराणां च कलहम् अवेक्ष्य वानरयूथपतिः किम् अचिन्तयत्? 2

(h) मदोद्धताः कपयः वानरयूथपतिं किम् अवदन्? 2

(i) सूपकारः, यूथपतिः—इति शब्दद्वयस्य संस्कृत-प्रतिशब्दः प्रदेयः। 2

(j) 'अहर्निशम्' इति पदे समासो कोऽस्ति? अपि च तस्य व्यासवाक्यं लिख्यताम्। 2

★★★